# Shri Ramakarma Nama Ashtavimshatyuttara Shata Stotram

# શ્રીરામકર્મનામાષ્ટાવિંશત્યુત્તરશતસ્તોત્રમ્

## Document Information

Text title : Shri Ramakarma Nama Ashtavimshatyuttara Shata Stotram

File name : rAmakarmanAmAShTAviMshatyuttarashatastotram.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

# શ્રીરામકર્મનામાષ્ટાવિંશત્યુત્તરશતસ્તોત્રમ્

અસ્ય શ્રીરામકર્મનામાષ્ટાવિંશત્યુત્તરશતરહસ્યસ્તોત્રમન્ત્રસ્ય,
વાલ્મીકિર્ભગવાન્ ઋષિઃ, અનુષ્ટુપ્છન્દઃ, શ્રીરામચન્દ્રઃ
પૌલસ્ત્યવિધ્વંસકઃ પરમાત્મા દેવતા, શ્રીરામચન્દ્રપ્રસાદસિદ્ધ્યર્થે
જપે વિનિયોગઃ ॥

પરમાત્મા પરબ્રહ્મ સચ્ચિદાનન્દવિગ્રહઃ ।
માયામયમહાલીલઃ સ્વયમ્ભૂર્વિષ્ણુરવ્યયઃ ॥ ૧॥

લક્ષ્મીક્ષમાનિત્યસેવ્યઃ શઙ્ખચક્રગદાધરઃ ।
અનન્તશયનઃ સર્વદેવપ્રિયકરઃ સદા ॥ ૨॥

સુરવૈરિકુલધ્વંસી માયામાનુષવિગ્રહઃ ।
શ્રીરામો રામચન્દ્રશ્ચ રામભદ્ર ઇતિ શ્રુતઃ ॥ ૩॥

પ્રભુર્લક્ષ્મણશત્રુઘ્નકૈકેયીતનયાગ્રજઃ ।
સર્વપ્રિયો દાશરથિઃ કૌસલ્યાનન્દવર્ધનઃ ॥ ૪॥

સર્વલક્ષણસમ્પન્નઃ સર્વજ્ઞઃ સદ્ગુણાકરઃ ।
વિશ્વામિત્રાનુયાયી ચ તાટકાપ્રવિઘાતનઃ ॥ ૫॥

લબ્ધસર્વાસ્ત્રકૌશલ્યો મારીચમુખરક્ષસામ્ ।
શિક્ષકો યજ્ઞગોપ્તા ચ ગાધિસૂનુકથારુચિઃ ॥ ૬॥

વિશદં પૂજિતોઽહલ્યાપાવનો જનકાર્ચિતઃ ।
શતાનન્દકથાપ્રીતઃ શૈવકોદણ્ડખણ્ડનઃ ॥ ૭॥

જાનકીવલ્લભઃ શ્રીમાન્ કૃતકૌતુકમઙ્ગલઃ ।
જામદગ્ન્યમહાદર્પદલનસ્તાતનન્દનઃ ॥ ૮॥

વૈદેહીસક્તહૃદયઃ પિતૃનિર્દેશકારકઃ ।
વનવાસપરઃ પૌરપ્રજાસઞ્ચયવઞ્ચકઃ ॥ ૯॥

નિષાદાધિપસેવ્યશ્ચ ભરદ્વાજાનુશાસિતઃ ।
ચિત્રકૂટકૃતાવાસઃ સીતાસૌમિત્રિમોદિતઃ ॥ ૧૦॥

ભરતાનુગ્રહીતા ચ રાજ્યાર્થન્યસ્તપાદુકઃ ।
દૃઢવ્રતો જયન્તાહિત્રાસાનુગ્રહકારકઃ ॥ ૧૧॥

અનસૂયાઙ્ગરાગાદિશોભિસીતાભિહર્ષિતઃ ।
દણ્ડકારણ્યસઞ્ચારી વિરાધવધપણ્ડિતઃ ॥ ૧૨॥

શરભઙ્ગાર્ચિતઃ સર્વતાપસૌઘવરપ્રદઃ ।
સુતીક્ષ્ણપૂજિતઃ સીતાધર્મોક્તિપરિતોષિતઃ ॥ ૧૩॥

ક્રમેણાધ્યુષિતાશેષતાપસાશ્રમમણ્ડલઃ ।
અગસ્ત્યસત્કૃતસ્તેન દત્તાસિશરકાર્મુકઃ ॥ ૧૪॥

કૃતપશ્ચવટીવાસો જટાયુર્લબ્ધસૌહૃદઃ ।
પર્યાયોદિતહેમન્તપ્રીતઃ સીતાસમન્વિતઃ ॥ ૧૫॥

દુષ્ટશૂર્પણખી(ખા)નાસાકર્ણયુગ્મનિકૃન્તનઃ ।
રાક્ષસીપદવીપ્રાપ્તદૃપ્તરક્ષોવિભેદનઃ ॥ ૧૬॥

ચતુર્દશસહસ્રોગ્રરક્ષોબલનિષૂદનઃ ।
ત્રિશિરોદૂષણારાતિરુન્મત્તખરઘાતનઃ ॥ ૧૭॥

મૈથિલીહૃદયાનન્દી માયામૃગવિમર્દનઃ ।
વૈદેહીમાર્ગણાસક્તો જટાયુસ્સદ્ગતિપ્રદઃ ॥ ૧૮॥

અયોમુખીભઙ્ગકરઃ કબન્ધભુજખણ્ડનઃ ।
શબરીપૂજિતઃ સમ્યગ્દર્શિતાશ્રમવૈભવઃ ॥ ૧૯॥

પમ્પાતીરે વનોલ્લાસદર્શનોલ્બણમન્મથઃ ।
હનૂમત્કૃતસંવાદઃ પ્રાપ્તસુગ્રીવસૌહૃદઃ ॥ ૨૦॥

સુગ્રીવદત્તવૈદેહીત્યક્તવસ્ત્રવિભૂષણઃ ।
સુગ્રીવાય પ્રતિજ્ઞાતવાલિનિર્વાપણઃ સ્વયમ્ ॥ ૨૧॥

પાદદંષ્ટ્રાસમુત્ક્ષિપ્તમાહિષાસ્થિસમુત્કરઃ ।
સપ્તતાલપ્રભેત્તા ચ કૃતસુગ્રીવલાઞ્છનઃ ॥ ૨૨॥

વાલિપ્રમથનો વાગ્મી તારાતત્ત્વોપદેશકૃત્ ।
સુગ્રીવકૃતસઙ્કેતઃ સુગ્રીવેપ્સિતરાજ્યદઃ ॥ ૨૩॥

વર્ષાસુ માલ્યવદ્વાસી લક્ષ્મણપ્રતિબોધિતઃ ।
ઋક્ષવાનરસઙ્ઘાતી દિક્ષુ પ્રેષિતવાનરઃ ॥ ૨૪॥

અઙ્ગુલીયપ્રદાતા ચ નિશ્ચિતાર્થો હનૂમતિ ।
હનુમન્મુખવિજ્ઞાતસીતોદન્તઃ પ્રસન્નધીઃ ॥ ૨૫॥

ચૂડામણિનિરસ્તાધિઃ સીતાવાક્યામૃતાપ્લુતઃ ।
હનૂમતઃ પરિષ્વઙ્ગપારિતોષિકદાયકઃ ॥ ૨૬॥

રક્ષોવધાભિનિર્યાયી સેનાનયવિશારદઃ ।
વિભીષણસ્યાભયદઃ શરણાગતવત્સલઃ ॥ ૨૭॥

સમુદ્રોપાસિતા રોષવેગક્ષોભિતસાગરઃ ।
શિવલિઙ્ગપ્રતિષ્ઠાતા નલસેતુવિધાયકઃ ॥ ૨૮॥

હનુમદ્વાહનશ્ચૈવ લઙ્કાદ્વારાવરોધકઃ ।
દશગ્રીવમહારત્નકિરીટવરભઞ્જનઃ ॥ ૨૯॥

ઉદીર્ણકુમ્ભકર્ણાદિસર્વરક્ષઃકુલાન્તકઃ ।
યુદ્ધે રાવણહન્તા ચ બ્રહ્માદિસુરસંસ્તુતઃ ॥ ૩૦॥

સીતાસમેતઃ શક્રાદિવરોત્થાપિતવાનરઃ ।
સુહૃત્સૌમિત્રિસીતાધિરૂઢપુષ્પવિમાનકઃ ॥ ૩૧॥

ભરદ્વાજાર્ચિતઃ સમ્યગ્ભરતાદિસમન્વિતઃ ।
નન્દિગ્રામગતઃ સ્નાતઃ સર્વાલઙ્કારભૂષિતઃ ॥ ૩૨॥

અયોધ્યાપુરવાસી ચ રાજ્યે પટ્ટાભિષેચિતઃ ।
તાલવૃન્તસિતચ્છત્રચામરાદ્યુપશોભિતઃ ॥ ૩૩॥

જાનકીનન્દનઃ સર્વસુહૃદ્વર્ગાભિહર્ષણઃ ।
હૃષ્ટપુષ્ટજનાકીર્ણઃ પુરરાષ્ટ્રાભિરઞ્જનઃ ॥ ૩૪॥

ઇત્યેવં રામચન્દ્રસ્ય કર્મનામ શુભાવહમ્ ।
અષ્ટાવિંશોત્તરશતં કીર્તિતં પરમર્ષિણા ॥ ૩૫॥

ગુહ્યાદ્ગુહ્યતરં પુણ્યં ભક્ત્યા યુક્તો નરઃ સદા ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૩૬॥

ઇતિ શ્રીરામનામાષ્ટાવિંશત્યુત્તરશતસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ramakarma Nama Ashtavimshatyuttara Shata Stotram*

pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*